# संस्कृतवार्ता:

**दिनाङ्क :-25.09.2024　　　　प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री / प्रत्यावर्तनम्**

प्रधानमन्त्री नरेन्द्रमोदी अमेरिकायाः त्रिदिवसीयायाः सफलयात्रायाः अनन्तरं ह्य: नवदिल्लीं प्रत्यागतवान् । यात्रावधौ तेन नैकैः नेतृभिः समं द्विपक्षीया चर्चा समनुष्ठिता। सः क्वाड्नेतृणां सम्मेलनेन सार्धं भारतामेरिकादेशयो: समुदायस्य कार्यक्रमेऽपि सम्मिलितोऽभवत्। तेन प्रमुख - अमेरिकादेशीयैः उद्यमिभिः सममपि चर्चा कृता। अस्मिन् यात्रावसरे तेन संयुक्तराष्ट्रमहासभाया: शिखरसम्मेलनमपि सम्बोधितम्।

**जम्मू-कश्मीर्-निर्वाचन**

जम्मू-कश्मीर्-राज्ये अद्य विधानसभा-निर्वाचनस्य द्वितीय-चरणीय- मतदानस्य कृते सर्वा: सज्जता: सम्पन्ना:। अस्मिन् चरणे षड्विंशति: विधानसभाक्षेत्रेषु मतदानं सम्पाद्यते। मतदानम् अद्य प्रातः सप्त वादनत: सायं षड् वादनं यावत् भविष्यति। अस्मिन् चरणे स्वतन्त्रं, निष्पक्षं, सुगमं च मतदानं निश्चेतुं सर्वाः व्यवस्थाः च कृताः सन्ति। अस्य चरणस्य प्रमुख-प्रत्याशिषु नेशनल- कॉन्फ्रेन्स्-दलस्य नेता पूर्वमुख्यमन्त्री च ओमारअब्दुल्ला: काङ्ग्रेस्-दलीय: प्रदेशप्रमुखः तारिख- हामीद- कराह: जम्मू-कश्मीरस्य भाजपेतिदलस्य अध्यक्षः रवीन्दररैना: अपनीपार्टीइत्यस्य दलस्य अध्यक्ष: अल्ताफबुखारी च सन्ति।

**निर्वाचनायोग:झारखंड राज्य**

निर्वाचनायोगः केन्द्र-राज्यानि झारखण्डस्य प्रवर्तन-संस्था: च स्पष्टीकृतवान् यत् झारखण्ड-राज्ये आगामिषु विधानसभा-निर्वाचनेषु धनशक्तिप्रयोगस्य विषये शून्यसहिष्णुता भविष्यति इति। मुख्य-निर्वाचन-आयुक्तस्य राजीवकुमारस्य नेतृत्वे निर्वाचन-आयोगस्य दलमेकं राज्ये निर्वाचनस्य सज्जतायाः समीक्षाम् अकरोत्, राजनीतिक-दलैः, सुरक्षासेनाभि: , अन्यैः सहभागिभिः च सह सभाम् अकरोत्। पश्चात् राञ्ची-नगरे वार्ताहरैः सह वार्तालापं कुर्वन् श्रीकुमारः अवदत् यत्, प्रलोभन-मुक्तं निर्वाचनं सुनिश्चिकर्तुं सम्बद्ध-अभिकरणानि निर्दिष्टानि इति।

**सर्वोच्चन्यायालय:- विद्यालया:**

सर्वोच्चन्यायलय: राज्यानि केन्द्रशासितप्रदेशान् च निर्दिष्टवान् यत् विद्यालयेषु बालनां सुरक्षा संरक्षा च केन्द्रस्य दिङ्निर्देशानामेव अन्तर्गतं भवेदिति। शीर्षन्यायालयेन राष्ट्रिय-बालाधिकारसंरक्षणायोग: राज्यै: केन्द्रशासित प्रदेशे: च सह समन्वयं विधातुं दिङ्निर्देशानां कार्यान्वयनस्य निरीक्षणं च कर्तुम् आदिष्ट:। न्यायमूर्ते: बी.वी. नागरत्नाइत्यस्य न्यायमूर्ते: एन्.कोटिश्वरसिंहस्य च संयुक्तपीठेन अभिव्यक्तं यत् विद्यालयेषु बालानां सुरक्षाया: संरक्षाया: च विषये दिङ्निर्देशा: अधिसूचिता: सन्ति इति। शीर्षन्यायालयस्य वक्तव्यमिदं महाराष्ट्रस्य बदलापुरं समेत्य केषुचित् विद्यालयेषु बालै: सह घटितानां यौनोत्पीडनघटनानाम् अनन्तरं सर्वकारीयेतर-संघटन द्वारा याचितावेदनस्य अन्तर्गतम् आगतमस्ति।

**उपराष्ट्रपति:- उत्तरप्रदेशव्यापारप्रदर्शनी**

उपराष्ट्रपति: जगदीपधनखड: अद्य ग्रेटरनोएडा-स्थले उत्तरप्रदेश-अन्ताराष्ट्रिय-व्यापार-प्रदर्शनस्य द्वितीय-संस्करणम् उद्घाटयिष्यति। अस्य पञ्च-दिवसीयव्यापार-प्रदर्शनस्य समापनं मासस्यास्य नवविंशति: दिनाङ्के भविष्यति। एतस्मिन् कार्यक्रमे उत्तर-प्रदेशस्य संस्कृति-व्यापारयो: प्रदर्शनं भविष्यति। सहभागिदेशत्वेन वियतनामदेशोऽपि सम्मिलितो भविष्यति। अस्य प्रदर्शनस्य प्रथमसंस्करणस्य उद्घाटनं गतवर्षे राष्ट्रपतिना द्रौपदीमुर्मु-वर्यया कृतमासीत्।

**टेनिसप्रतिस्पर्धायां**

जीवन-नेदुनचेझियान-विजयसुन्दर-प्रशान्तयोः भारतीययुगलं चीनदेशे हाग्चोउ-टेनिस-इत्येतस्याः प्रतिस्पर्धायाः पुरूषयुगलस्य उपाधिम् अधिगतवत्।

**।।इति वार्ताः।।**